# प्रश्न–पत्र की योजना

कक्षा– **उच्चमाध्यमिकः**
विषयः–संस्कृतसाहित्यम् ( SS12)
अवधिः–3घण्टे15 मिनट (सपादहोरात्रयम्) पूर्णांकाः–80

1. उद्देश्यानाम् अंकभारः –

| क्र.स. | उद्देश्यम् | अंकभारः | प्रतिशतम् |
|---|---|---|---|
| 1. | ज्ञानम् | 17 | 21.25% |
| 2. | अवबोधः | 33 | 41.25% |
| 3. | ज्ञानोपयोगः | 21 | 26.25% |
| 4. | कौशलम् | 09 | 11.25% |
| | **योगः** | **80** | **100%** |

2. प्रश्नानांप्रकारानुसारम् अंकभारः –

| क्र. सं. | प्रश्नानांप्रकाराः | प्रश्नानां संख्याः | प्रतिप्रश्नम् अंकाः | कुलाकाः | प्रतिशतम् अंकानाम् | प्रश्नानांप्रतिशतम् | सम्भावित–ः समयः |
|---|---|---|---|---|---|---|---|
| 1. | वस्तुनिष्ठ–प्रश्नाः | 15 | 1 | 15 | 18.75 | 30.00% | 20 निमेषाः |
| 2 | रिक्तस्थानम् | 07 | 1 | 07 | 08.75 | 14.00 | 15 निमेषाः |
| 3 | अतिलघूत्तरात्मक–प्रश्नाः | 17 | 1 | 17 | 21.25 | 20.00% | 20निमेषाः |
| 4 | लघूत्तरात्मक–प्रश्नाः | 9 | 2 | 18 | 22.50 | 22.00% | 48निमेषाः |
| 5. | दीर्घउत्तरीय प्रश्न | 3 | 3 | 9 | 11.25 | 08.00% | 40निमेषाः |
| 6 | निबंधात्मक–प्रश्नाः | 3 | 5,5,4 | 14 | 17.50 | 06.00% | 52निमेषाः |
| | **योगः** | **20/54** | | 80 | 100 | 100% | 195 निमेषाः |

3. विषयवस्तूनाम् अंकभारः –

| क्र.सं. | विषय वस्तु | अंकभार | प्रतिशत |
|---|---|---|---|
| 1 | पठित–अवबोधनम् | 30 | 37.50 |
| | | | |
| 2 | संस्कृतसाहित्येतिहासस्य परिचयः | 10 | 12.50 |
| | | | |
| 3 | छन्दोऽलंकाराः | 10 | 12.50 |
| | | | |
| 4 | अपठित–अवबोधनम् | 08 | 10.00 |
| | | | |
| 5 | रचनात्मककार्यम् | 10 | 12.50 |
| | | | |
| 6 | व्याकरणम् | 12 | 15.00 |
| | योग | 80 | 100 |

Downloaded from cclchapter.com

# प्रश्न–पत्रस्य नीलपत्रम्(ब्ल्यू प्रिन्ट)

कक्षा– उच्चमाध्यमिकः कक्षा–द्वादशः **विषयः– संस्कृत–साहित्यम्** पूर्णांकाः–80

| क्र. सं. | उद्देश्यविधाः / उपविधाः | ज्ञानम् | | | | | | अवबोधः | | | | | | ज्ञानोपयोगः / अभिव्यक्तिः | | | | | | कौशलम् / मौलिकता | | | | | | योगः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | वस्तुनिष्ठः | रिक्तस्थानम् | अति.लघुः | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | वस्तुनिष्ठः | रिक्तस्थानम् | अति.लघुः | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | वस्तुनिष्ठः | रिक्तस्थानम् | अति.लघुः | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | वस्तुनिष्ठः | रिक्तस्थानम् | अति.लघुः | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | |
| 1 | पठित–अवबोधनम् | 5(1) | | | | | | 6(-) | | | 6(3) | | | | | | | 9(3) | | | | | | | 4(1) | 30(8) |
| | | | | | | | | | | | | | | | | | | | | | | | | | | |
| 2 | संस्कृतसाहित्येतिहासस्य परिचयः | | | 5(1) | | | | | | 5(-) | | | | | | | | | | | | | | | | 10(1) |
| | | | | | | | | | | | | | | | | | | | | | | | | | | |
| 3 | छन्दोऽलंकाराः | 2(-) | | | | | | | | | 4(2) | | | | | | 4(2) | | | | | | | | | 10(4) |
| | | | | | | | | | | | | | | | | | | | | | | | | | | |
| 4 | अपठित–अवबोधनम् | | | | | | | | | 2(1) | 3(1) | | | | | 2(1) | 1(1) | | | | | | | | | 8(4) |
| | | | | | | | | | | | | | | | | | | | | | | | | | | |
| 5 | रचनात्मककार्यम् | | | | | | | | | | | | | | | | | | 5(1) | | | | | | 5(1) | 10(2) |
| 6 | व्याकरणम् | 2(-) | | 3(-) | | | | | 7(1) | | | | | | | | | | | | | | | | | 12(1) |
| | योगः | 9(1) | | 8(1) | | | | 6(-) | 7(1) | 7(1) | 13(6) | | | | | 2(1) | 5(3) | 9(3) | 5(1) | | | | | | 9(2) | 80(20) |
| | सर्वयोगः | 17(2) | | | | | | 33(8) | | | | | | 21(8) | | | | | | 9(2) | | | | | | 80(20) |

विकल्प–योजना :–प्र.सं. 4, 6, 15, 16, 17, 18, 19 तः 20प्रश्नेषु एक आंतरिकविकल्पः अस्ति।

अवधेयम्–कोष्ठकाद् बहिः संख्या अंकबोधिकाआंतरिकसंख्या च प्रश्नबोधिका।

हस्ताक्षर

**No. of Questions-20**

**No. of printed Pages –**

कक्षा–उच्चमाध्यमिक
विषयः–संस्कृतसाहित्यम्, कोड–12
उच्चमाध्यमिकपरीक्षा–2024

समयः – 3:15 होराः पूर्णांकाः 80

परीक्षार्थिभ्यः सामान्यनिर्देशाः–

(1) परीक्षार्थिभिः सर्वप्रथमंस्वप्रश्नपत्रोपरिनामांकः अनिवार्यतोलेख्यः।
(2) सर्वेप्रश्नाः अनिवार्याः।
(3) सर्वेषांप्रश्नानामुत्तराणिउत्तरपुस्तिकायामेवलेख्यानि।
(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेख्यानि।
(5) सर्वेषांप्रश्नानामुत्तराणिसंस्कृतमाध्यमेनैवलेखनीयानि।

# मॉडलप्रश्नपत्र (आदर्शप्रश्नपत्रम्)

कक्षा–उच्चमाध्यमिकः, 2024

विषयः–संस्कृतसाहित्यम्,कोड–12

समयः – 3:15 होराः पूर्णांकाः 80

## खण्डः–"अ"

1. वस्तुनिष्ठप्रश्नाः–

(i) वरतन्तुशिष्यः कः? 1

(अ) कौत्सः (ब) आरुणिः

(स)शुकदेवः (द)नचिकेता

(ii) अपरिणाममोपशमोदारुणोविद्यते– 1

(अ)लक्ष्मीमदः (ब)मदः

(स)प्रभुमदः (द)कीर्तिमदः

(iii) 'बालकौतुकम्' इतिपाठः कस्मात् ग्रन्थात् संकलितः? 1

(अ) मृच्छकटिकात् (ब) महावीरचरितात्

(स) उत्तररामचरितात् (द) मुद्राराक्षसात्

(iv) स्वायत्तमेकान्तगुणम् अज्ञतायाः छादनंकेनविनिर्मितम्? 1

(अ)भ्रात्रा (ब)मात्रा

(स)विधात्रा (द)पित्रा

(v) प्रीतिलक्षणंकतिविधम्? 1

(अ) पंचविधम् (ब)चतुर्विधम्

(स) सप्तविधम् (द)षड्विधम्

(vi) 'त्वमेव' इत्यत्र कः गणः? 1

(अ)जगणः (ब)मगणः

(स)यगणः (द) तगणः

(vii) वर्णसाम्यंकस्मिन्नलंकारेभवति? 1

(अ)रूपकालंकारे (ब)अनुप्रासालंकारेः

(स) यमकालंकारे (द)श्लेषालंकारे

(viii) 'ज्ञान + मतुप् इत्यत्र किंपदंभवति? 1

(अ) ज्ञानम् (ब) ज्ञायमानः

(स) ज्ञानवान् (द) ज्ञातवान्

(ix) 'पावकः' इत्यत्र कः सन्धिः?किं च सूत्रम्? 1

(अ) एचोऽयवायावः(अयादिः) (ब) आद् गुणः (गुणः)

(स) इको यणचि (यण्) (द) अकः सवर्णेदीर्घः (दीर्घः)

2. रिक्तस्थानानिपूरयत–

उचित–उपपदविभक्तिंलिखत–

| | | |
|---|---|---|
| (i) | ....................सहपुत्रः ग्रामम् अगच्छत्। (पितृ) | 1 |
| (ii) | ......................नमः। (प्रजापति) | 1 |
| (iii) | ....................कृतेभोजनंददातु। (अस्मद्) | 1 |
| (iv) | ..................परितः वृक्षाः सन्ति। (ग्राम) | 1 |

प्रकृतिप्रत्यय–संयोगंकृत्वालिखत–

| | | |
|---|---|---|
| (v) | सदैवईश्वरः .......................। (स्मृ + अनीयर्) | 1 |
| (vi) | तेनकिं ...........................? (दृश् + क्त) | 1 |
| (vii) | बालकाः ................................ तत्रगच्छन्ति। (पठ् + तुमुन्) | 1 |

3. (क) अतिलघूत्तरात्मकप्रश्नाः–

| | | |
|---|---|---|
| (i) | मेघदूतस्य लेखकः कः? | 1 |
| (ii) | उपनिषदांनामान्तराणिकानिविद्यन्ते? | 1 |
| (iii) | उत्तररामचरितंकस्य कवेःरचनास्ति? | 1 |
| (iv) | श्रीमद्भगवद्गीतामहाभारतस्य कस्मिन् पर्वणिविद्यते? | 1 |
| (v) | कविताकामीन्याः वाणः कीदृशः वर्णितः? | 1 |
| (vi) | मीरापुरस्कारेण कः साहित्यकारः प्रसिद्धः? | 1 |
| (vii) | 'लेनिनामृतम्' इतिमहाकाव्यस्यः लेखकः कः? | 1 |
| (viii) | विद्योदयःनामसंस्कृतपत्रिकायाः सम्पादकः कः? | 1 |
| (ix) | शिवराजविजयस्य रचयिता कः? | 1 |
| (x) | समुद्रसंगमः इतिग्रन्थस्य लेखकः कः? | 1 |

(ख) अधोलिखितपदानांसूत्रोल्लेखपूर्वकंसंधिविच्छेदंकुरुत– 1+1+1=3

(अ) महोदयः (ब)उज्ज्वलः (स) तल्लयः

## खण्डः–"ब"

4.अधोलिखितयोः छन्दसोः एकस्य छन्दसः लक्षणमुदाहरणं च लिखत। 2

(क) वंशस्थम्, (ख) मालिनी

5.अधोलिखित–श्लोकांशस्य गणचिह्नंप्रदर्शयन् छन्दसः नामोल्लेखंकुरुत। 2

(क) सन्मित्रलक्षणमिदंप्रवदन्तिसन्तः।

6.अधोलिखितयोः अलंकारयोः कस्यचिद् एकस्य लक्षणम् उदाहरणं च लिखत। 2

(क) अर्थान्तरन्यासः (ख) उत्प्रेक्षा

7.अधोलिखित–श्लोकांशस्यअलंकारस्य लक्षणंलिखत। 2

(क) यूथेऽपयातेहस्तिग्रहणोद्यतेनकेनकलभोगृहीतः।

8.अधोलिखितश्लोकस्यअन्वयंलिखत। 2

सर्वत्र नोवार्तमवेहिराजन्! नाथेकुतस्त्वयशुभंप्रजानाम्।
सूर्येतपत्यावरणाय दृष्टेः कल्पेतलोकस्य कथंतमिस्राः।।

9.अधोलिखितशब्दानाम् अर्थंलिखत। 2

(क) प्रेत्य, (ख) प्रत्याहारः, (ग) लगुढम्, (घ) विटपी

10.हिन्दीभाषायांसप्रसंगंभावार्थंलिखत। 2

क्षीयन्ते खलुभूषणानिसततंवाग्भूषणंभूषणम्।

11–14. अधोलिखितम् अपठितगद्यांशंपठित्वाप्रश्नानाम् उत्तराणि यथानिर्देशंलिखत।

संसारे एकतायाः अतीवावश्यकतावर्तते।एकतामनुष्ये शक्तिमादधाति।विशेषतः कलियुगेऽस्मिन् संहतिः कार्यसाधिका। यतोहिवर्तमानकाले यादृशंराष्ट्रियं च जीवनमस्ति, तस्य निर्माणाय रक्षरणाय च संघटनंपरमावश्यकम्।अद्यत्वेसंसारे यस्मिन् राष्ट्रे एकतायाः अभावोऽस्ति, तत् राष्ट्रं सद्य एव परतन्त्रतापाशबद्धं भवति।अस्माकंदेशस्य पारतन्त्र्यम् अनया एव एकतयासहयोगेन वा विच्छिन्नंजातम्।महात्मनागान्धिमहोदयेनतथैवान्यैश्चदेशभक्तैः भारतीयसमाजेसर्वत्र एकत्वभावनोदयेनपराधीनतापाशस्य छेदनंविहितम्। अधुनालोकतन्त्रात्मकमस्माकंराष्ट्रंसंघटनबलेनैवस्वोन्नतिंविदधातिअत एवोच्यते–'संघे शक्तिः कलौ युगे'।

11.एकपदेनउत्तरत– ½x4=2

(क) संसारेकस्याः आवश्यकताभवति ?
(ख) कलियुगेकुत्र शक्तिः ?
(ग) राष्ट्रंकथंस्वोन्नतिंविदधाति?
(घ) एकतामनुष्ये किम् आदधाति ?

12.पूर्णवाक्येनउत्तरत– 1+1+1=3

(क) देशस्य पारतन्त्र्यम् कथंविच्छिन्नंजातम्?
(ख) कैःपराधीनतापाशस्य छेदनंविहितम ?
(ग) राष्ट्रस्य निर्माणाय रक्षणाय च किंपरमावश्यकम् ?

13.भाषा–सम्बद्धकार्यम्– ½x4=2

(क) राष्ट्रंसंघटनबलेनैवस्वोन्नतिंविदधाति।इत्यत्र कर्तृपदंलिखत।
(ख) राष्ट्रं सद्य एवपरतन्त्रतापाशबद्धं भवति।इत्यत्र विशेष्यपदंकिम्?
(ग) ''संहतिः कार्यसाधिका'' इत्यत्र विशेषणपदंलिखत।
(घ) 'अवनतिः' इत्यस्य विलोमपदंलिखत।

14.अस्य गद्यांशस्य समुचितं शीर्षकंलिखत। 1

## खण्डः–"स"

15.अधोलिखितंपठितगद्यांशंपठित्वाप्रश्नानाम् उत्तराणि यथानिर्देशंलिखत। 5

भवादृशा एव भवन्तिभाजनान्युपदेशानाम् ।अपगतमलेहिमनसिविशन्तिसुखेनोपदेशगुणाः ।हरतिअतिमलिनमपि दोषजातंगुरूपदेशः गुरूपदेशश्चनामअखिलमलप्रक्षालनक्षमम् अजलंस्नानम् ।विशेषेणतुराज्ञाम् ।विरलाहितेषामुपदेष्टारः ।राजावचनमनुगच्छतिजनोभयात्।

(i) यथानिर्देशम् उत्तरंलिखत– 1+1+1=3

(क) केषांभवादृशा एवभाजनानिभवन्ति? (एकपदेन उत्तरत्)

(ख) मनसि के विशन्ति? (एकपदेन उत्तरत्)

(ग) गुरूपदेशश्चनामकिम्? (पूर्णवाक्येन उत्तरत्)

(ii) भाषिककार्यम्–(प्रदत्तविकलपेभ्यः उत्तरं चिनुत–) 1+1=2

(क) 'राजावचनमनुगच्छतिजनः' इत्यत्रकर्तृपदंकिम् ?

(अ) राजा (ब) वचनं

(स) गुरुः (द) जनः

(ख) 'तेषाम्' इतिसर्वनामपदस्य संज्ञापदंलिखत।

(अ) राज्यानां (ब) मित्राणां

(स) राज्ञां (द) मूर्खाणां

### अथवा

चतुर्णांपरस्परंविवादोलग्नः ।ततोब्राह्मणोराजसमीपमागत्य चतुर्णांविवादवृतान्तमकथयत् ।राजापितच्छ्रुत्वातस्मैब्राह्मणाय चत्वार्यपिरत्नानिददौ ।इतिकथांकथयित्वापुत्तलिकाराजानमवदत्, भोराजन्! त्वयेवंविध–सहजमौदार्यंविद्यतेचेदस्मिन् सिंहासनेसमुपविश।

(i) यथानिर्देशम् उत्तरंलिखत– 1+1+1=3

(क) कतीनांपरस्परंविवादोलग्नः? (एकपदेन उत्तरत्)

(ख) कः राजसमीपमागत्य चतुर्णांविवादवृतान्तमकथयत्?(एकपदेन उत्तरत्)

(ग) कस्मैचत्वार्यपिरत्नानिददौ? (पूर्णवाक्येन उत्तरत्)

(ii) भाषिककार्यम्–(प्रदत्तविकलपेभ्यः उत्तरं चिनुत–) 1+1=2

(क) 'सहजमौदार्यम्' इत्यत्र विशेषणपदंकिम् ?

(अ) सहनम् (ब) सह

(स) उदारम् (द) औदारम्

(ख) 'पुत्तलिकाराजानमवदत्' इत्यत्रकर्तृपदंलिखत।

(अ) राजा (ब) ब्राह्मणः
(स) पुत्तलिका (द) अवदत्

16. **अधोलिखितंपद्यांशंपठित्वाप्रश्नानाम् उत्तराणि यथानिर्देशंलिखत।** 5

पापान्निवारयति योजयतेहिताय,
गुह्यं निगूहतिगुणान् प्रकटीकरोति।
आपद्गतं च न जहातिददातिकाले,
सन्मित्रलक्षणमिदंप्रवदन्तिसन्तः।।

(i) यथानिर्देशम् उत्तरंलिखत– 1+1+1=3

(क) कस्मात् निवारयति?(एकपदेन उत्तरत्)
(ख) कस्मै योजयते ?(एकपदेन उत्तरत्)
(ग) कान् प्रकटीकरोति?(पूर्णवाक्येन उत्तरत्)

(ii) भाषिककार्यम्–(प्रदत्तविकलपेभ्यः उत्तरं चिनुत–) 1+1=2

(क) 'सन्मित्रम्' इत्यत्रविशेषणपदंकिम् ?
(अ) असत् (ब) मित्रम्
(स) सत् (द) न कोऽपि
(ख) 'सन्मित्रलक्षणमिदंप्रवदन्तिसन्तः' इत्यत्र कर्तृपदंलिखत।
(अ) सन्तः (ब) इदम्
(स) लक्षणम् (द) सन्मित्रम्

**अथवा**

असूर्यानामतेलोकाअन्धेनतमसाऽऽवृताः।
तांस्तेप्रेत्याभिगच्छन्ति ये के चात्महनोजनाः।।

(i) यथानिर्देशम् उत्तरंलिखत– 1+1+1=3

(क) के लोकाः ?(एकपदेन उत्तरत्)
(ख) लोकाः केनआवृत्ताः?(एकपदेन उत्तरत्)
(ग) तेकदाअभिगच्छन्ति?(पूर्णवाक्येन उत्तरत्)

(ii) भाषिककार्यम्–(प्रदत्तविकलपेभ्यः उत्तरं चिनुत–) 1+1=2

(क) 'अन्धेनतमसा' इत्यत्रविशेषणपदंकिम् ?
(अ) तमसा (ब) अन्धेन
(स) लोकाः (द) असुर्याः
(ख) 'अभिगच्छन्ति' इत्यत्रकर्तृपदंलिखत।
(अ) लोकाः (ब) जनाः

(स) प्रेत्याः (द) तान्

17. अधोलिखितंनाट्यांशंपठित्वाप्रश्नानाम् उत्तराणि यथानिर्देशंलिखत। 5

अरुन्धती–अतिजवेनदूरमतिक्रान्तः स चपलः कथं न दृश्यते?
बटवः– पश्यतुकुमारस्तादाश्चर्यम्।
लवः – दृष्टमवगतंच।नूनमाश्वमेधिकोऽयमश्वः।
बटवः –कथंज्ञायते ?
लवः–ननूमूर्खाः ! पठितमेवहि युष्माभिरपितत्काण्डम्।किं न पश्यथ ? प्रत्येकं शतसंख्याः कवचिनोदण्डिनोनिषंगिणश्चरक्षितारः।

(i) यथानिर्देशम् उत्तरंलिखत– 1+1+1=3
(क) कुमारः किं पश्यतु? (एकपदेन उत्तरत्)
(ख) अयमष्वः कीदृषः?(एकपदेन उत्तरत्)
(ग) कतिसंख्याः रक्षितार ? (पूर्णवाक्येन उत्तरत्)

(ii) भाषिककार्यम्–(प्रदत्तविकलपेभ्यः उत्तरं चिनुत–) 1+1=2
(क) 'कवचिनोरक्षितारः' इत्यत्र विशेषणपदंकिम् ?
(अ) रक्षितारः (ब) मूर्खाः
(स) कवचिनो (द) काण्डम्
(ख) 'स चपलः कथं न दृश्यते' इत्यत्र कर्तृपदंलिखत।
(अ) चपलः (ब) कथम्
(स) दृश्यते (द) न

अथवा

स्वप्निलः–बलराम ! अद्य कक्षायांकोऽपिविशिष्टः कार्यक्रमः ?
बलरामः–अरेमित्र ! त्वं न जानासि? इदानींतु योगशिक्षायाः कालांशः।
मोहिनी– एषः तुनूतनः विषयः। किंप्रतिदिनम् ईदृशी कक्षाप्रचलिष्यति?
बलरामः–आम्, अधुनातुअस्माकंकृते योगशिक्षाअतीवउपयोगिनीअस्ति।
सागरिका–अहो! सुखदमाश्चर्यम्।अहमपिगृहेमातुः मुखाद् योगशिक्षायाः विषयेश्रुतवती।तयाउक्तम्–'योगः स्वास्थ्यकरः'।

(i) यथानिर्देशम् उत्तरंलिखत– 1+1+1=3
(क) इदानींकस्याः कालांशः?(एकपदेन उत्तरत्)
(ख) कः स्वास्थ्यकरः?(एकपदेन उत्तरत्)
(ग) काउपयोगिनीअस्ति ?(पूर्णवाक्येन उत्तरत्)

(ii) भाषिककार्यम्–(प्रदत्तविकलपेभ्यः उत्तरं चिनुत–) 1+1=2
(क) 'योगः स्वास्थ्यकरः' इत्यत्र विशेष्यपदंकिम् ?
(अ) स्वास्थ्यः (ब) स्वास्थ्यकरः
(स) योगः (द) करः
(ख) 'कक्षाप्रचलिष्यति' इत्यत्र कर्तृपदंलिखत।

(अ) कक्षा (ब) ईदृशी
(स) प्रचलिष्यति (द) प्रतिदिनम्

## खण्डः–"द"

18.रेखाकिंतपदेषुप्रश्ननिमाणंकुरुत। (केषांचित् चतुर्ण्णाम्) **1x4=4**

(क) उत्पथैः ममनः परिप्लवं धावति।
(ख)अश्वमेध इतिनामक्षत्रियाणांमहान् उत्कर्षनिकषः।
(ग) तेकर्मणिअधिकारः।
(घ)हितोपदेशदायिनोगुरून् खेदयन्ति।
(ङ) केयूराणिपुरुषंभूषयन्ति।
(च) सर्वत्र नीरजराजितंनीरम् अस्ति।

19. अधोलिखितवाक्यानांसंस्कृतभाषायाम् अनुवादः करणीयः। (केषांचित् पंचानाम्) 5

(क)राजादुर्जनकोदुःख देताहै।
(ख)गुरु के पासशिष्य बैठाहै।
(ग) माताचावलोंसेभातपकायेगी।
(घ)उद्यान के चारोंओर वृक्ष हैं।
(ङ) बालकगेंदसे खेला।
(च) राजाकवि के साथ घूमा।
(छ) शत्रु कानसेबहराहै।
(ज) पिता को नमस्कार।

20.निम्नलिखितयोः कमपिविषयंस्वीकृत्य 50–60 शब्देषुसंस्कृतभाषायांनिबन्धंलिखत। 5

(क) पर्यावरण–संरक्षणम्।
(ख) भारतीयसंस्कृतिः।
(ग) स्त्रीशिक्षा।